## पाथोनदीभ्यां ड्यण्। (१११/३४५७)

पाथःशब्दान् नदीशब्दाच्च ड्यण् प्रत्ययो भवति तत्र भवः इत्येतस्मिन्नर्थे[1]। यतोऽपवादः। पाथसि भवः 'पाथ्यो वृषा' (ऋ. ६. १६. १५)। 'च नो दधीत नाद्यो गिरो मे' (ऋ. २.३५.१)। पाथः अन्तरिक्षम्॥

## वेशन्तहिमवद्भ्यामण्। (११२/३४५८)

वेशन्तशब्दाद्धिमवच्छब्दाच्च अण् प्रत्ययो भवति तत्र भवः इत्येतस्मिन् [2]विषये। यतोऽपवादः। 'वैशन्तीभ्यः स्वाहा' (तै. सं. ७. ४. १३. ९)। 'हैमवतीभ्यः स्वाहा[2]' (शौ. १९. २. १)॥

## स्रोतसो विभाषा ड्यड्ड्यौ। (११३/३४५९)

स्रोतःशब्दाद् विभाषा ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः तत्र भव. इत्येतस्मिन् विषये। यतोऽपवादः। [3]पक्षे सोऽपि भवति। स्रोतसि भवः 'स्रोत्यः' (ऋ. १०. १०४.८)। 'स्रोतस्यः' (अ. १९. २. ४)। ड्यड्ड्ययोः [4]स्वरे विशेषः॥

## सगर्भसयूथसनुताद् यन्। (११४/३४६०)

सगर्भसयूथसनुतशब्देभ्यो यन् प्रत्ययो भवति तत्र भवः इत्येतस्मिन् विषये। यतोऽपवादः। स्वरे विशेषः। 'अनु भ्राता सगर्भ्यः। अनु सखा सयूथ्यः' (तै. सं. १. २. ४.२)। 'यो नः सनुत्यः' (ऋ. २.३०.९)। सर्वत्र समानस्य छन्दसि (६. ३. ८४/१०१२) इति सभावः॥

## तुग्राद् घन्। (११५/३४६१)

तुग्रशब्दाद् घन् [5]प्रत्ययो भवति तत्र भवः इत्येतस्मिन् विषये। यतोऽपवादः। 'त्वमग्ने [6]वृषभस्तुग्रियाणाम्'। [7]अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्दः॥

## अग्राद् यत्। (११६/३४६२)

अग्रशब्दात् यत् प्रत्ययो भवति [8]तत्र भवः इत्येतस्मिन् [9]विषये। अग्रे [10]भवम् 'अग्र्यम्' (खि. १. ३. ७)। किमर्थमिदं यावता सामान्येन [11]यद् विहित एव? 'घच्छौ च' (४. ४. ११७/३४६३) इति वक्ष्यति. ताभ्यां बाधा मा भूत् इति पुनर्विधीयते॥

## घच्छौ च। (११७/३४६३)

अग्रशब्दात् [12]यत् घच्छौ च प्रत्यया भवन्ति तत्र भवः इत्येतस्मिन् [13]विषये। '[14]अग्र्यम्' (खि. १. ३. ७), अग्रियम् (ऋ. १. १३. १०), 'अग्रीयम्' (मै. २. ७.१३. १३)। चकारः 'तुग्राद् घन्' (४. ४. ११५/३४६१) इत्यस्यानुकर्षणार्थः। अग्रियम्। स्वरे विशेषः॥

---

1. विषये ब. 2. अर्थे फ 3. पक्षे नास्ति फ. 4. स्वरविशेषः ज. 5. प्रत्ययः नास्ति फ. 6. विषमः ह, तुग्रियाणाम् नास्ति ब. ई. 7. अग्न्याकाश फ. ज, अग्न्याकाशयजुषि शिष्टः तुग्रशब्दः ड. 8. भवार्थे फ. 9. अर्थे ह. 10. भवः अग्र्यः ज. 11. यत् नास्ति फ. 12. यत् नास्ति ब. ड. ई. फ. 13. अर्थे फ 14. अग्र्यम् नास्ति ब. ड.